www.thearyasamaj.org

अप्रैल, मई २०१६ ईसवीयाब्दः ओ३म् R.N.I.Regd. No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

'भारते भातु भारती'

# पञ्चवटी

-डा. रामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृतविभागाध्यक्षश्च
महामना-मालवीय-महाविद्यालयः, खेकड़ा
बागपत-२५०१०१ (उत्तरप्रदेशः)

(१)
पञ्चानां वटानां समाहारः पञ्चवटी स्मृता ।
अगस्त्यसत्कारात् पश्चाद् रामः पञ्चवटीं गतः ॥

(२)
तत्र रामस्याऽनुमत्या लक्ष्मणः कुटीं निर्ममे ।
रामः ससीतः स्नाति स्म गोदावर्यां च सानुजः ॥

(३)
लक्ष्मण आनयति स्म कन्दमूलफलानि च ।
सर्वे तानि खादन्ति स्म पिबन्ति स्म नदीजलम् ॥

(४)
एकदा शूर्पणखा सा तत्राऽऽजगाम राक्षसी ।
श्रीरामं कामयमाना तं परिणेतुमब्रवीत् ॥

(५)
ततः स परिहासाय लक्ष्मणं तामदर्शयत् ।
अयं विरहितः पत्न्या त्वमेनं हि परिणयेः ॥

(६)
सा लक्ष्मणं विवाहयितुमुक्तवती सादरम् ।
स चोवाच तद्दासोऽहं दासपत्नी भविष्यसि ॥

(७)
ततः सीतां खादामीति क्रुद्धाऽभ्यधावत्तां प्रति ।
लक्ष्मणस्तामनुधाव्य चिच्छेद तस्याः नासिकाम् ॥

(८)
रुदन्ती विरूपा भूत्वा सा द्रुतं हि पलायिता ।
रामकिशोरमिश्रेण पञ्चवटी सा वर्णिता ॥

www.thearyasamaj.org

दूरभाषः - ०९२१९४०६०७८
०९२१९४०६०७४

# भारतोदयः

संस्कृत - मासिकपत्रम्

वर्षम् - १०६ अङ्कौ - १०, ११

सम्पादकः
डॉ. हरिगोपालशास्त्री
व्याकरणाचार्यः
एम.ए., पीएच. डी.
राष्ट्रपति-पुरस्कृतः

सह - सम्पादकः
डा.केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम.ए., पीएच. डी.

प्रबन्ध - सम्पादकः
डॉ. अजयकौशिकः
साहित्याचार्यः
एम.ए., पीएच. डी.

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम्-२४९४०४
(उत्तराखण्ड-प्रदेशः)

## शुल्क - विवरणम्

| | | |
|---|---|---|
| प्रत्यङ्कम् | - | ५/- |
| वार्षिकम् | - | ५०/- |
| आजीवनम् | - | ५००/- |

## विषयानुक्रमणिका

| | | |
|---|---|---|
| १. श्रुति-सुधा | -महर्षिदयानन्दसरस्वती | ०३ |
| २. विद्योत्तमा (४) | -डॉ. आचार्यरामकिशोरमिश्रः | ०४ |
| ३. वाल्मीकीय-रामायणस्य भाषा-सौष्ठवम् | -डॉ. विजयकुमारत्यागी | ०९ |
| ४. विवेकानन्द-विजयः | -डॉ. शिवबालकद्विवेदी | १२ |
| ५. वैदिक-वाङ्मये पर्यावरण-चिन्तनम् (प्राकृतिकपर्यावरणसन्दर्भविशेषे) | -डॉ. विनीत-घिल्डियालः | १४ |

राष्ट्रियसंस्कृतसंस्थानस्य अनुदान-साहाय्येन प्रकाशितम्
भारतोदयः(संस्कृत-मासिकम्)
(RNI Regd. No. UPBIL/1998/1485)

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः ज्वालापुरम् पत्रालयः- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, पत्रालयः - गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि, यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

www.thearyasamaj.org

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी ।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

| वर्षम्- १०६ | वैशाखः, ज्येष्ठः २०७३ विक्रमाब्दः ❋ अप्रैल, मई २०१६ ईसवीयाब्दः | अङ्कौ- १०, ११ |
|---|---|---|

## ❋ श्रुति-सुधा ❋

ओ३म् त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते ।
अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥

-ऋग्वेदः १/१०/५२/१

पदार्थः -

(**त्यम्**) तं सभाध्यक्षम् (**सु**) शोभने (**मेषम्**) सुखेन सर्वान् सेक्तारम् (**महय**) पूजय। (**स्वर्विदम्**) स्वरन्तरिक्षं विन्दति येन, तम् ( **शतम्** ) असंख्याताः (**यस्य**) इन्द्रस्य (**सुभ्वः**) ये जनाः सुष्ठु सुखं भावयन्ति, ते। (**साकम्**) सह (**ईरते**) गच्छन्ति प्राप्नुवन्ति (**अत्यम्**) अश्वम्। (**न**) इव (**वाजम्**) वेगयुक्तम् (**हवनस्यदम्**) येन हवनं पन्थानं स्यन्दते, तम् (**रथम्** ) विमानादिकम् (**आ**) समन्तात् (**इन्द्रम्**) परमैश्वर्यवन्तम् (**ववृत्याम्**) वर्त्तयेयम्। (**अवसे**) रक्षणाद्याय (**सुवृक्तिभिः**) सुष्ठु शोभना वृक्तयो दुःख-वर्जनानि यासु क्रियासु, ताभिः॥७॥

भावार्थः -

**मनुष्याः यथाऽश्वं नियोज्य रथादिकं चालयन्ति, तथैतैर्वह्न्यादिभिर्यानानि वाहयित्वा कार्याणि साधयेयुः** ॥७॥

-महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, २१ पृष्ठे ]

www.thearyasamaj.org

मार्च-२०१६ मासादनुवृत्तम्

# ❋ विद्योत्तमा (४) ❋

-डॉ. आचार्यरामकिशोरमिश्र:
पूर्वोपाचार्य: संस्कृतविभागाध्यक्ष:
महामना-मालवीय-महाविद्यालय:
खेकड़ा, बागपत (उ.प्र.)

(१०)

**कुर्यामहं केन विधिना तं स्वाधीनं प्रेम्णा विना पतिम् ।**
**अद्य मे स्थिति: परमविचित्रा सधवाऽहं विधवेव विभामि ?॥**

हा! सखि! किं कुर्यां ? प्रतिज्ञया मे सर्वं नष्टम्। तमानेतुं किं गच्छेयं गुरुकुलमिति विद्योत्तमोक्तमाकर्ण्य कुशलिका निवेदयामास। राजकुमारि!

**पतिसङ्गमो न यया गृहीत-**
**स्तन्नारीजीवनेन कोऽर्थ: ? ।**
**अनुनय तं शृणु राजदारिके!**
**पत्न्या पति: प्रपूज्यो भवति ॥**

कुशलिके इयं समयस्य बलवत्ता, या सर्वमिह शुभमशुभं वा कारयति। गच्छ पितरं सर्वमुक्त्वा सहाऽऽनय तं शीघ्रमित्याकर्ण्य सा गता। तया सह मातापितरौ समागतौ। पुत्रि! किमागतस्ते पति: कालिदास: ? आ पित: ! स मम प्रश्नोत्तरं दत्वा गत:। किमासीत् प्रश्नोत्तरं पुत्रि ? '**अस्ति कश्चिद् वागर्थ:**' इति मम प्रश्नमनुदिश्य तेनैतानि त्रीणि काव्यानि प्रणीतानि। पित: ! अहो! एतानि त्रीणि काव्यानि **रघुवंशं, मेघदूतं, कुमारसम्भवं** च किन्तेन लिखितानि वत्से! आ: !

पित: ! एषां काव्यानां प्रश्नानुसारं क्रमोऽस्ति **कुमारसम्भवं, मेघदूतं, रघुवंशश्च**। सम्प्रति स: कविरस्ति मात: ! यथाऽहं तमैच्छम्, तथा स: संवृत्त:। किमधुनापि बाले! त्वया स: सहवासाय न कथित: ? कथितो मया स मात: ! परं स तथा नाऽमन्यत। त्वया स पतिर्न स्वीकृत: पुत्रि!, मया स पतिरङ्गीकृत: पित: !, परं स: सम्प्रति मां पत्नीं न मन्यते, गुरुं मन्यते। मम प्रतिज्ञा सर्वं विनाशितवती। पूर्वं तु स: मूर्ख आसीत्, परं पश्चान्मे भर्त्सनया स विद्वान् कविश्च संवृत्तस्तदा तेनाऽहं परित्यक्ता। अधुनाऽहं तमानेतुं गुरुकुलं यामि। पित: ! सेना-प्रबन्ध: क्रियताम्।

**काशिराज:** -

यो मनसा न मन्यते पुत्रि!,
स किं बलेन मंस्यते बाले!।
अनुनयेन विनयेन पतिस्तु,
जेतुं शक्यो नैव बलेन ॥

**राज्ञी** -

अत: सेनया किं भविष्यति!,
गच्छेरेकाकिनी त्वमेव।
एकान्ते स्वं पतिं प्रसादय,
ह्यनुनयेन मधुरा-प्रलापेन ॥

www.thearyasamaj.org

यथा भवतो: सहमति:, तदनुसारमाचरिष्यामि। अधुनाऽहं गुरुकुलं गच्छामि, प्रदेयाऽऽशी:।

मातापितरौ –

गच्छ पुत्रि! स्यन्दनमारुह्य,
बुद्ध्या सदाचरेस्तद्येन।
स त्वां पत्नीमङ्गीकुर्याद्,
इत्याशीर्वाद: प्रदीयते॥

(११)

काशिराज-शारदानन्दस्य राज्ञश्च शारदाया आत्मजा शास्त्रार्थ-विदुषी पराजित-पण्डिता राजकुमारी विद्योत्तमा काशी-गुरुकुलं प्राप्याऽऽचार्यशिवनाथं ववन्दे।

शिवनाथ: –

स्वस्त्यस्तु ते राजसुते सुविज्ञे,
भूया: स्वसौभाग्यवती चिराय।
कविकालिदासात् पुत्रं लभस्व,
कथये: किमर्थं त्वमिहाऽऽगताऽसि॥

विद्योत्तमा – आचार्यवर!

यस्माज्जनयितुं तनयं भवन्त:,
शुभाशिषं मह्यं दत्तवन्त:।
तमत्र मार्गयितुं ह्यागताऽहम्,
गुरो! तमाकारय सोऽस्ति कुत्र॥

नाऽत्र स राजकुमारि! स साम्प्रतमुज्जयिन्यां भविष्यति। तत्र स राज्ञा वीर-विक्रमादित्येन राजकविपदे नियुक्तोऽस्ति। तत्रैव गच्छे: राज-साहाय्येन तमवश्यमेव प्राप्स्यसीति ममाऽऽशीर्वाद:। किं त्वं तं पतिं मन्यसे? इति शिवनाथोक्तमाकर्ण्य प्रतिज्ञयाऽधुनाऽहं तं पतिं मन्ये, परं स मयि दुर्मनायते, इति विद्योत्तमया कथितमाकर्ण्य शिवनाथ उवाच-

हृदयेन कामयते त्वां कवि: स,
कवि-प्रेरणा त्वं तत्कल्पना च।
त्वमेव तच्चित्ते काव्यमूर्ति-
रधिकारिणी त्वं तस्यैव जाया॥
विद्योत्तमे! विद्या वस्तुतस्त्वम्,
कृतस्त्वया भर्त्सनया बुध: स:।
तत: कवी भवितुं प्रेरितस्त्वया,
तत्काव्यलक्ष्यं त्वं राजपुत्रि!॥

अतस्त्वमित उज्जयिनीं गच्छ। तत्र तव कार्यसिद्धिर्भविष्यतीति निशम्य सा गुरुकुलाज्जगाम।

(१२)

जय जय शिव शङ्कर महादेव!,
जगत: कर्ता धर्ता त्वमेव।
हे महाकाल! त्वं हर्ताऽसि,
निजसेवकविपदोऽवश्यमेव॥
भक्ताऽहं ते प्रार्थनां च मे,
उज्जयिनीश्वर शृणु विश्वदेव!।
सफलं कुरु मे शरणागमनं
जय शिव जय हर जय महादेव!॥

उज्जयिन्यां क्षिप्रा-तटे महाकालेश्वर-मन्दिरे भगवतो महाकालेश्वरस्य स्तवं कृत्वा राज्ञो वीर-विक्रमादित्यस्य राजसभां विद्योत्तमा प्राप। तत्र तया न्यायार्थमावेदितम्। राजा तामाहूय स्वविषयं प्रस्तोतुमवादीत्।

विद्योत्तमा पप्रच्छ यत्पत्याः स्थानं क्वऽस्ति राजन्!? तस्याः पत्युश्चरणयोः भद्रे! किमेतद् भवतः सभा स्वीकरोति? कथन्नेति श्रुत्वा विद्योत्तमा निवेदितवती-

नैवं महाराज! शृणु वचनम्,
अस्तीदृशोऽपि सज्जनः एकः।
यो भवन्मतं नाङ्गीकुरुते,
तस्यैवाऽहं त्यक्ता पत्नी॥

विक्रमादित्यः -

सः कोऽस्ति राजसभायामस्याम्? तन्नामाक्षराणि विज्ञापय।

विद्योत्तमा -

राजसभा-भूषणं वर्तते, सः कालिदासः कविर्मे पतिः ? किमुक्तं त्वया? कविकालिदास- स्तव पतिर्भद्रे! इति राजवचनमाकर्ण्य विद्योत्तमा न्यवेदयत्-

मामयमग्निं साक्षीकृत्य,
पूर्वं पत्नीमङ्गीकृतवान्।
परमधुना निजचरणसेविका-
मपि स्वीकर्तुं वाञ्छति नैव॥
तन्न्यायं कुरु न्याय-प्रिय नृप!
उज्जयिनीश्वर! शृणु ममाऽनर्थम्।
परिणेता गच्छेत् परिणीताम्,
कविः कालिदासो मम भर्ता॥

सभासदामेकः -

मा कार्षीः सुभगे! त्वं चिन्ताम्,
न्यायो भविता त्वां प्रति नूनम्।
उज्जयिनीशो न्यायं कुरुते,
यस्य प्रसिद्धिर्विश्रुता जनैः॥

अपरश्च -

न्यायः क्रियतां राजन् यस्यै,
कविसेवाऽवसरः प्रदाप्यताम्।
यस्माल्लोके कविजायेयम्,
पत्या त्यक्ता दुःखं नेयात्॥

'मान्याः सभासदः! अधुनाऽहं कविं कालिदासं पिपृच्छिषामि, यदेषा काशिराजपुत्री विद्योत्तमा यत्किञ्चित्कथयति, तत्किं सत्यम्? अतः कविकालिदासः स्ववक्तव्यं सभासदामग्रे खलु प्रस्तौतु।' इति राजवचो निशम्य कालिदासेनोक्तं राजन्! सभासदश्च! मम वक्तव्यं शृण्वन्तु भवन्तः -

तत्सत्यं नास्त्यखिलं राजन्!,
पत्नीं मतवानिमां यदाऽहम्।
तदा पतिमियं नामन्यत,
मां भूयः कः पतिपत्नीबन्ध!॥

सभासदः -

कालिदास-कथनं नोपेक्ष्यं भवतो न्यायस्तादृशो भवेत्।
येन भवेतां द्वावपि तुष्टौ राजन्नित्थं प्रार्थयामहे॥

शृण्वन्तु मान्याः! सभासदः!, अस्मिन् पतिपत्नी-विवादे मम न्यायस्तादृशो भविता, यादृशं भवन्तः समीहन्ते। अधुनाऽहं विद्योत्तमामपि पिपृच्छिषामि, यत्किमेतदपि सत्यमस्ति यत्कविः कालिदासः कथयति। तद् भद्रे! निस्सङ्कोचं सर्वां लज्जां परित्यज्य तत्सर्वं कथय, यत्सत्यं स्यादिति राजवचनं श्रुत्वा विद्योत्तमा प्रोवाच -

www.thearyasamaj.org

मया प्रतिज्ञा कृतैकदेयं,
यन्मे पतिः स विद्वान् भविता।
यो मां पराजयेत विवादाद्,
अभूत्तु तत्कर्तुमलं न कोऽपि ?

भद्रे! पुनस्तव विवाहः कविना सह कथमभवदित्याकर्ण्य विद्योत्तमाऽवदत्-

सा प्रतारणासीत् पराजिता ये विद्वांस आनयन्।
सम्मिलितास्ते मूर्खमिह कविं मौनबुधं यमकथयन्॥
श्रावयितुं तद् वृत्तमहं नृप! धारयामि लज्जाम्।
सर्वमपि सत्यं कथये त्वाम् ?

विक्रमादित्यः – राजसुते!

त्यज लज्जां तथ्यं तथ्यं तद् यत्किञ्चित् प्रस्फोटय।
दुग्धं पयश्च द्वे अपि भद्रे! परस्परं नो मेलय॥
या संघटिता घटना विज्ञे! श्रावय श्रावय ताम्।
वयं सत्यं कथयामस्त्वाम्॥

राजन्! तां छलपूर्णघटनां कथयामि। एकदा मत्तः पराजिताः सर्वे विद्वांसः सम्मिलिता भूत्वा पूर्वमेनं मूर्खं मौन-पण्डितमुद्घोष्य मौखिक-शास्त्रार्थस्थाने मौन-शास्त्रार्थाय मां प्रेरितवन्तः। ततो गुरुकुलाचार्येण विज्ञापितैरिङ्गित-समाधानैः सन्तुष्टैः सर्वैः सभासद्भिः पराजिताऽहमुद्घोषिता। तदनन्तरमनेन मौन-पण्डितेन सह पित्रा मे विवाहः कृतः। अहमप्येनं पतिमङ्गीकृत्य प्रमोदिताऽऽसम्। सौभाग्यरात्रावस्य वार्तया मौन-पाण्डित्यं नष्टं, मूर्खत्वञ्च प्रकटितम्। प्रतिज्ञानुसारमहं विद्वांसं पतिमीहे स्म। अतो मूर्खमेनमकथयं यत्त्वमितो गच्छ, विद्वान् भूत्वा यदाऽऽगमिष्यसि, तदाऽहं त्वां पतिं मंस्ये। यदानीमयं विद्वान् भूत्वा समागतस्तदानीमहमेनं कवीकर्तुमैच्छम्। अद्य कविर्भूत्वाऽयं मां पत्नीं न मन्यते, गुरुं मां कथयति, परमहमेनं पतिं मन्ये।

सभासदः -

तन्नृप कालिदास-पत्नीयम्,
पुनरिमां स किं स्वीकरोति न?।
भवन्नयोऽन्वेषयितुं वस्तु तत्,
येन सत्यमस्त्वगोपनीयम्॥

विक्रमादित्यः -

अथ यत्सत्यं भवत्समक्षम्,
प्रकाशयति शीघ्रं निजरूपम्।
सभासदः! शान्त्या हि भवन्तः,
कर्णयन्तु मम निर्णय-रीतिम्॥

मान्याः सभासदः! अधुनाऽहं कविकालिदासं पृच्छामि, यत्स कथमेतत् कथयति यदेषा विद्योतमा तं पतिं नामन्यत।

कालिदासः -

महाराज! सत्यं कथयेऽहम्,
प्रेमनिशायां राजकुमारी।
पतिमस्वीकुर्वती मामियम्,
मामत्यजद् मूर्खमुक्त्वा नृप!॥
मम वचने स्यात् किञ्चिदसत्यम्,
किमपि भवेत् तत्कथने तथ्यम्।
तदयं दण्ड्यो जनोऽन्यथा वा,
स्वीकार्यो मम पत्नी-त्यागः॥

महाराज! विवाहानन्तरं रात्रौ शयन-कक्षे राजकुमारी विद्योत्तमा मूर्खमुक्त्वा मां पतिं न स्वीकृतवती, कक्षाच्च मां निस्सारितवती। तत्कथमधुनाऽहमेनां

www.thearyasamaj.org

पत्नीमङ्गीकुर्याम्? इति कवेरुक्तं श्रुत्वा विक्रमादित्यो विद्योत्तमामपृच्छत् किमेतत् सत्यं यत्त्वं कालिदासं पतिमङ्गीकर्तुं न्यषेधीः? नहि महाराज! नाहं कविकालिदासं पतिं स्वीकर्तुं न्यषेधिषम्। पति-स्वीकार-विषये मम प्रार्थनां शृणोतु भवान्-

अहमद्यापि पतिमिमं मन्ये,
परमयमेको मम परिणेता।
यः परिणीतामस्वीकुरुते,
तदहं भवतो न्यायमपेक्षे॥

सभासदः -

न्यायप्रिय राजन्! न्यायः स्यात्,
कविना पत्नी स्वीकर्तव्या।
पतिमद्यापि मन्यते सा तम्,
अतो न पतिविरहः स्यादस्याः॥

विक्रमादित्यः - सभासद्वर्याः!

अये! भवद्भिः शान्तैर्भाव्यम्,
न्यायः साम्प्रतमग्रे सरति।
सत्यं समक्षमागच्छति भोः,
सावधानमखिलं निशम्यताम्॥

'राजन्! भवानधुना कालिदासं कथयतु यत् सः विद्योत्तमां पत्नीं स्वीकरोतु।' इति सभासत्कथितमाकर्ण्य कविवर! अधुना किं वक्तुमना असि? इति राज-प्रश्नं श्रुत्वा महाराज! विद्योत्तमा यत्किञ्चिदुक्तवती तत्सर्वमसत्यमेव। सम्प्रति मम सत्यवचनं श्रूयताम्- तस्यामियं मेलराकायां स्वपतिं यदि मामग्रहीष्यदिह, तदियमद्य न स्थितिरभविष्यद् यस्या नृप! साम्मुख्यं क्रियते॥

यथा कृतो न पुरा पतिमान-
स्तामहमद्य न पत्नीं मन्ये।
अवसरवादिनीयमपि तन्मे,
पत्नी-त्यागपत्रमुरीकुरु॥

राजन्! किं कविकालिदासेन पत्नी-त्यागपत्रमपि दत्तमिति सभासदुक्तमाकर्ण्य तेन त्यागपत्रमपि दत्तमिति राजवचनं श्रुत्वा तेन त्यागपत्रेण सर्वे सभासदो विज्ञापिता भवेयुरिति सभासदां वचो निशम्य हे त्यागपत्ररक्षक! यत्त्वया कविकालिदासात् पत्नीत्यागपत्रं प्राप्तं, तत्सभायामत्र वाचयित्वा प्रकाश्यतामिति राजाऽऽदेशं प्राप्य त्यागपत्ररक्षकः कथयति-

मान्याः सभासदः! महाराजस्य आदेशानुसारेणाऽहं कविकालिदासस्य पत्नीत्यागपत्रं वाचयित्वा श्रावयामि। श्रूयताम् कविकालिदासेनाऽत्र लिखितम्-

राजाधिराज! नृप उज्जयिनीनरेश!,
आदित्य विक्रम! अहं कवि कालिदासः।
काशीनरेशदुहितुर्यदिदं विरुद्धम्,
आवेदये सविनयं शृणु तद्धि देव!॥
विद्योत्तमा वदति मां पतिमात्मनः सा,
सर्वत्र जीवन-पथे प्रददाति बाधाम्।
स्वात्मा यया नहि कदापि समर्पितो मे,
भूयः कथं मिथुनबन्धनमद्य राजन्!॥
षड्-वर्षपूर्वमनया भवने स्वकक्षा-
न्निष्कासितः स्वशयनादवतारितोऽहम्।
किं व्यस्मरद् मुखकृतां मम भर्त्सनां सा,
भूयः कथं मिथुनबन्धनमद्य राजन्!॥
पश्चान्निजात् परिणयादनया कदापि,
निर्वाहितो न परिणीतरमात्वधर्मः।
कायोऽपि मह्यमपि नैव समर्पितः स्वः,
भूयः कथं मिथुनबन्धनमद्य राजन्!॥
राज्ञः सुतेयमभिमानमपीह धत्ते,
न श्रद्दधाति हि पतिं प्रति बोधयुक्ता।
मन्ये प्रियां न तदिमां परिणीतपूर्वाम्,
तत्त्यागपत्रमुररीकुरु मेऽद्य राजन्!॥

[ क्रमशः ]

www.thearyasamaj.org

# वाल्मीकीय-रामायणस्य भाषा-सौष्ठवम्

-डॉ. विजयकुमारत्यागी
अतिथि-व्याख्याता
श्रद्धानन्द-वैदिक-शोधसंस्थानम्
गुरुकुल-कांगड़ी-विश्वविद्यालयः
हरिद्वारम् ( उत्तराखण्डम् )

वाल्मीकीय-रामायणे सन्तीमानि भाषासौष्ठव-कारणानि। आदिकविना कृदन्त-क्रियया सह भूतार्थे कर्तुः प्रयुज्यंते। तत्र-तत्र प्रकरणेषु निबद्धेषु श्लोकेषु अध्येतृभिः सरलप्रक्रियाभिः पार्थक्यैस्सुस्पष्टैः कर्तृकर्मक्रियावाचकानि पदान्यवलोकितानि अवबुद्धानि च सन्ति। व्याकरण-दृष्ट्या शिष्टाः शब्दाः वृद्धोच्चारिता कृताः न्यस्ताश्च। आदिकविना लिट्लकाराणां क्रियानां प्रयोगाः साधिताः। स्वीयेषु श्लोकेषु मन्ये भूतकालस्य लिट्लकारस्य बहुसंख्याकः आहोस्वित् वक्तव्यं बहुधा क्रिया स्वीयेषु श्लोकेषु संस्थापिता, परञ्च तिङन्तान्तर्गते लुट्-विषयकाः क्रिया स्वीयेषु श्लोकेषु नियोजिता। आदिकविना भाषासौष्ठवान्तर्गते लङ्लकारस्य बाहुल्येन प्रयोगाः विहिताः सन्ति।

आदिकविना वाल्मीकिना भूतार्थस्य क्रियाद्वयमाक्षिप्तम्- (क) कर्मणि क्त-प्रत्ययान्तेन सह विविधा अनेकधा बहुधा प्रयोगाः रचिताः स्वीयेषु श्लोकेषु। अहम् अतिशयेन ताः क्रियाः अद्राक्षम्। (ख) क्तवत् प्रत्ययान्तेन सह कर्तरि भूतार्थे क्रियाः अधिरोपिताः स्वीयेषु श्लोकेषु महर्षिणा।

स्वीयेषु श्लोकेषु यथास्थानेषु कर्तृकर्मक्रियाणां प्रयोगाः समाचरिताः। कर्तुः विशेषणानि कर्तृणा सह यथास्थानमादिकविना प्रयुक्तानि। कर्मणा सह कर्मणः विशेषणानि उपस्थाप्यन्ते। क्रियया सह क्रियाविषयकविशेषणानि निरूप्यन्ते। मम्मटाचार्यानुसारेण काव्यलक्षणमेतत् '**तददोषौ शब्दार्थौ सगुणावनलंकृति पुनः क्वापि** ।' आदिकवेः प्रोक्ते काव्ये एतत्काव्यस्य लक्षणं श्लोकेषु वाल्मीकीय-रामायणे पदे-पदे विलसति। उत्तम-काव्यस्य कोट्यामेतत् महाकाव्यम् अवतिष्ठति। उच्चैस्तमां चकास्ति इह जगति भाति अस्य महाकाव्यस्य कीर्ति खद्योतने।

काव्योक्तविविधालङ्कारा अवलोक्यन्तो वाल्मीकीयरामायणे। यथा -

१. उपमाऽलङ्कारः -

बाहुविक्षेपमीनोऽसौ विक्रन्दितमास्वनः ।
प्रकीर्णकेशशैवालः कैकेयीवडवामुखः ॥

-अयोध्याकाण्डम् ५९/३०

www.thearyasamaj.org

चारुस्मिते चारुदति चारुनेत्रे विलासिनि ।
मनोहरसि मे भीरु सुपर्णं पन्नगं यथा ॥

-सुन्दरकाण्डम् २०/२९

शरजालांशुमाञ्छूरः कपे रामदिवाकरः ।
शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥

-सुन्दरकाण्डम् ३७/१८

न चापि मम हस्तात् त्वां प्राप्तुमर्हति राघवः ।
हिरण्यकशिपु कीर्तिभि इन्द्रहस्तगतामितः ॥

-सुन्दरकाण्डम् २१/२८

भव मैथिलि भार्या मे मोहमेतं विसर्जय ।
बह्वीनामुत्तममन्त्रीणां ममाग्रे महिषी भव ॥

-सुन्दरकाण्डम् २१/१६

आयतीमिव विधवस्तामाज्ञां प्रतिहतामिव ।
दीप्तामिव दिशं काले पूजापहतामिव ॥

-सुन्दरकाण्डम् २१/१२

## २. उपमेयोपमाऽलङ्कारः -

'ददृशुस्ते महात्मानो वाताहतजलाशयम् ।
अनिलोद्धूतमाकाशे प्रवालान्तमिवोर्मिभिः ॥

-युद्धकाण्डम् ४/१२०

रामार्थं वानरार्थं च चिकीर्षन् कर्म दुष्करम् ।
समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥

-सुन्दरकाण्डम् १/३०

## ३. व्यतिरेकालङ्कारः -

लक्ष्मीश्चन्द्रादपेयाद् वा हिमवान् वा हिमं त्यजेत् ।
अतीयात् सागरो वेलां न प्रतिज्ञामहं पितुः ॥

-अयोध्याकाण्डम् ११२/१८

## ४. निदर्शनालङ्कारः -

पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक् ।
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि राक्षस ॥

-अरण्यकाण्डम् ४७/३८

## ५. दृष्टान्तालङ्कारः -

कथं हि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति ।
अहं त्वानुगमिष्यामि यत्र वत्स गमिष्यसि ॥

-अयोध्याकाण्डम् २४/१

## ६. तुल्ययोगितालङ्कारः -

निद्रा शनैः केशवमभ्युपैति ,
दुतं नदी सागरमभ्युपैति।
हृष्टा बलाका घनेभ्युपैति ,
कान्ता सकामा प्रियमभ्युपैति॥

-किष्किन्धाकाण्डम् २८/२५

## ७. लोकोक्तिप्रयोगाः -

लोकप्रवादः सत्योऽपि पण्डितैः समुदाहृतः ।
अकाले दुर्लभो मृत्युः त्रिया वा पुरुषस्य वा ॥

-सुन्दरकाण्डम् २५/१२

भर्ता नाम परं नार्या शोभनं भूषणादपि ।
एषा हि रहिता तेन शोभनार्हा न शोभते ॥

-सुन्दरकाण्डम् १६/२६

भवभूतिना प्रोक्तं वचः '**कारुण्यं भवभूतिरेव तनुते।**' अस्य वचसः मूलश्रोतमेतद् वाल्मीकीय-रामायणमेव विद्यते, रामायणे बालकाण्डस्य द्वितीयसर्गस्य दशमश्लोकतः षोडशतमश्लोकपर्यन्तम् अस्य मूलम्। भरतनाट्यानुसारेण साम्पूर्णिकी रसस्य परिभाषा सार्थकत्वेन वाल्मीकीय-रामायणे स्थानेषु स्थानेषु भाति द्योतते वा।

www.thearyasamaj.org

रामायणे रस-प्रयोगोऽपि विहितः वर्तते, तद् यथा-

१. वीर-रसः -

अरण्य-काण्डे २५तमसर्गात् ३०तम-सर्ग-पर्यन्तं वीररसवैशिष्ट्यं प्रतिपादितमस्ति।

२. रौद्र रसः-

अरण्य-काण्डे १२तमे सर्गे रौद्र-रस-प्रतिपादनमवलोक्यते।

३. भयानकरसः -

अरण्य-काण्डे २३ तम सर्गः भयानक-रस-प्रयोग-दृष्ट्या विशिष्ट-सर्गोऽस्ति।

४. करुण-रसः -

करुण-रस-वैशिष्ट्यं बालकाण्डे प्रतिपादितमस्ति। यथा-

समाक्षरैश्चतुर्भिर्य पादैर्गीतो महर्षिणा ।
सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागतः ॥

-बालकाण्डम् २/४०

तस्य बुद्धिरियं जाता महर्षेर्भावितात्मनः ।
कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम्॥

-बालकाण्डम् २/४१

(क) करुणरसात्मकः काव्योत्पत्ति-हेतुः -

तस्मात् तु मिथुनादेकं पुमांसं पापनिश्चयः।
जघान वैरनिलयो निषादस्तस्य पश्यतः ॥

-बालकाण्डम् २/१०

तं शोणितपरीताङ्गं चेष्टमानं महीतले ।
भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥

-बालकाण्डम् २/११

वियुक्ता पतिना तेन द्विजेन सहचारिणा ।
ताम्र-शीर्षेण मत्तेन पत्रिणा सहितेन वै ॥

-बालकाण्डम् २/१२

तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम् ।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥

-बालकाण्डम् २/१३

ततः करुणवेदित्वादधर्मोऽयमिति द्विजः ।
निशम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥

-बालकाण्डम् २/१४

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काम-मोहितम् ॥

-बालकाण्डम् २/१५

तस्येत्थं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ।
शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया॥

-बालकाण्डम् २/१६

(ख) अन्याः करुणरसात्मकाः श्लोकाः -

अशोक शोकापनुद शोकोपहतचेतनम् ।
त्वन्नामानं कुरु क्षिप्रं प्रियासंदर्शनेन माम् ॥

-अरण्यकाण्डम् ६०/१७

(ग) करुणशृङ्गाररसात्मकः श्लोकः -

यदि ताल त्वया दृष्टा पक्व तालोपमस्तनी ।
कथयस्व वरारोहां कारुण्यं यदि ते मयि ॥

-अरण्यकाण्डम् ६०/१८

गुणरीत्यलङ्काराणां प्रचुर-रूपेण वाल्मीकीय-रामायणे संग्रहो विद्यते। गुणरीत्यलङ्काराणां पिपासुभिः जिज्ञासुभिश्च शोधकार्याणि कृतानि सन्ति। अतस्तावद् एतदीयं विषयमधिकृत्य अस्माभिः अतिविस्तृतत्वेन न लिख्यते। अस्य महाकाव्यस्य लघुनि पदानि श्लोकेषु न्यस्तानि सन्ति। एतेन जायते रामायणस्य भाषायाः सरलरीत्या अर्थः, सम्यक्तया केनापि अवबुद्ध्यते। भाषायास्सौष्ठवं सरसं सारल्यं केनापि न समालोच्यते। वाल्मीकीय-रामायणे भाषागतकाठिन्यं न कुत्रचित् अस्ति।

अत एव निर्णयो निर्णीयते यत् वाल्मीकीय-रामायणस्य भाषासौष्ठवम् अनूचानाः यत्र तत्र सर्वत्र चर्चयन्ति, मण्डयन्ति चेति।

www.thearyasamaj.org

# ❋ विवेकानन्द-विजयः ❋

-डॉ. शिवबालकद्विवेदी
प्राचार्यः, बद्रीविशालस्नातकोत्तरमहाविद्यालयः
११७/७१ ए ब्लाक क्यू शारदानगरम्
कानपुरम्-२०८०२५ (उत्तरप्रदेशः)

(१)
राजते सागराङ्के मुदामेरिका,
यस्य गायन्ति गीतं नराः भूतले।
तत्र रम्यं शिकागो शुभं पत्तनं,
शोभते वै नवीनं धरा-भूषणम्।।

(२)
धार्मिकास्तत्र धर्मस्य हेतोर्मुदा,
आययुः प्रीतचित्ताः प्रसन्नाननाः।
यत्र सङ्गीत-वाद्यैस्तु खं गुञ्जितं
प्रस्तुतं तत्र वैरोजसद्भाषणम्।।

(३)
धर्मपालाः स्वराष्ट्रस्य नीत्वा ध्वजां,
गौरवायागताः स्वस्य धर्मस्य ते।
तत्र दिव्या छटाभूद् धरायाः परा,
रेजिरे यत्र धर्मस्य संवाहकाः।।

(४)
कार्डिनालो गिबन्मः प्रधानो मतः,
यस्तु संयुक्तराज्यस्य धीरो गुरुः।
तत्र गौराङ्गगात्रो नरेन्द्रोऽद्भुतः,
प्राप शोभां प्रभाते यथा भास्करः ।।

(५)
कोविदाः ये धरायास्तु तत्रागता,
धर्मविद्या-प्रमाणे च पारङ्गताः।
ते पठित्वा स्वलेखं प्रकाशं ददुः,
धर्ममार्गस्य मत्वा प्रमाणं परम्।।

(६)
मे स्वसारः प्रियाश्चैव मे बन्धवः,
यस्य सम्बोधनेनैव लोको जितः।
स्वागतं हस्ततालैर्जनाश्चक्रिरे,
तं नरेन्द्रं नमामो धरा-गौरवम्।।

(७)
सिद्धवाणीं समाकर्ण्य मुग्धा नरा,
आप्नुवन् ते प्रमोदं परं मानसे।
पूर्णिमायां सुधांशुं यथा वीक्ष्य वै,
सागरो मोदमानो हि धत्ते सुखम्।।

(८)
कोऽप्यवादीच्च धर्मो मदीयो वरः,
अस्ति धर्मः प्रभुर्मेऽब्रवीच्चापरः।
मे च धर्म-प्रभा वै धरा-गौरवं,
तत्र प्राचीकरच्चैव भावं बुधः।।

(९)
धन्यवादः सतां ज्ञानिनां सर्वथा,
तत्त्वबोधाय वः शेमुषी संरता।
अस्ति धर्मश्च कः तस्य तत्त्वं च किं,
ईश्वरस्यास्ति पुण्या प्रवृत्तिश्च का?।।

www.thearyasamaj.org

(१०)

कोविदानां विवादं समाकर्ण्य सः,
शान्तिशीलो विवेको बभाषे मुदा।
कूप-मण्डूकता नैव मे रोचते,
व्यापकं सागरं पश्य धर्मोऽस्ति कः?॥

(११)

यस्य वासोऽस्ति कूपे, न जानाति सः,
सागरोऽप्यस्ति लोके जलैश्शोभितः।
धर्मवृत्तिर्न संकीर्णतां याति वै,
व्यापकश्चास्ति धर्मो यथा सागरः॥

(१२)

**'ब्रह्म'** तत्रास्ति केन्द्रस्य बिन्दौ परं,
यत्तु धर्मैर्विभिन्नैर्हि संगम्यते ।
तत्तु केनापि धर्मस्य मार्गेण वै
प्राप्यते मानवैरस्ति सत्यं परम्॥

(१३)

तत्र धर्मेण चिन्मङ्गलं राजते सः,
यत्र सेवानुरागः प्रयोगो नवः।
भाति रम्या त्रिवेणी बुधैर्वन्दिता,
त्याग-भावस्य सत्यस्य वृत्तस्य च ॥

(१४)

धर्मशक्त्या जगद् रक्ष्यते प्रत्यहं,
यत्र धर्म-प्रभा तत्र राष्ट्र-प्रभा।
राजनीतिर्न नीतिः समाजस्य च,
यत्र धर्मस्य नीतिः परा राजते॥

(१५)

भावबोधोऽस्ति धर्मश्च धर्मो विभुः,
अस्ति लोको हि धर्मस्य तत्त्वं परम्।
तत् सुराष्ट्रं समृद्ध्या च संमोदते,
यत्र धर्मापगा स्यन्दते शीतला ॥

(१६)

धर्म-भावैः प्रकाशो नरैर्लभ्यते,
याति देवत्वभावं पशुर्मानवः।
मानवस्यास्ति केन्द्रं परं सीमितं,
ईश्वरस्यास्ति केन्द्रं तु सर्वत्र वै ॥

(१७)

पुण्य-योगस्तु पुष्णाति दैवीगुणान्,
पुण्य-योगेन सन्तो लभन्ते सुखम्।
पुण्य-योगैः प्रसादः सदा लभ्यते,
भाव्यते भक्ति-योगः सुपुण्यैः सदा॥

(१८)

प्राप्यते पुण्य-योगेन सेवा-रसः,
वर्द्धते येन धर्मो जगन्मङ्गलम्।
येन नूनं विनष्टा घृणा सर्पिणी,
भास्करस्योदये किं तमो दृश्यते?॥

(१९)

अस्ति स्वार्थोऽसुरः स्वार्थहन्ता सुरः,
अस्ति चैकशुचिश्चैव पापोऽपरः।
अस्ति चैकं धरायाः हि दिव्या शुभा,
चास्ति नूनं द्वितीयं विषं घातकम्॥

(२०)

नास्ति सत्यं जगद् ब्रह्म सत्यं मतं,
दृश्यते यद् यथा नैव तद् वै तथा।
मायया भासते विष्टपं चान्यथा,
ब्रह्म नित्यं ह्यनन्तं परं शाश्वतम्॥

(२१)

वर्द्धतां ब्रह्मयोगस्य निष्ठा नृणां,
ज्ञान-योगेन वै मानवो नन्दतु।
भातु सत्यं शिवं सुन्दरं भूतले,
प्राप्य वेदान्त-तत्त्वं धरा मोदताम्॥

www.thearyasamaj.org

# ❋ वैदिकवाङ्मये पर्यावरण-चिन्तनम् ❋

## ( प्राकृतिकपर्यावरणसन्दर्भविशेषे )

-डॉ. विनीत घिल्डियालः
संस्कृत-विभागे
हेमवतीनन्दनबहुगुणा-गढवालविश्वविद्यालये
श्रीनगरम् (उत्तराखण्डप्रदेशः)

यत्किञ्चिदपि अस्मान् परिवृणोति, जीवनञ्चास्माकं प्रत्यक्षाप्रत्यक्षरूपेण प्रभावयति, तत्सर्वमेव '**पर्यावरणम्**' इत्यनेन पदेनाभिहितम्। एवं सति जल-वायु-पृथिवी-दहन-गगनाख्यानि पञ्चभूतानि, वन-वृक्ष-वनस्पतयः लतौषधयश्च वन्य-पशवः पालित-पशवश्च जलचर-खेचर-सरीसृप-कीटादयश्च जन्तवः सर्वेऽप्येते पर्यावरणस्य प्राकृतिक-घटकास्सन्ति।

वैदिक-वाङ्मये पर्यावरणम्प्रत्यस्माकम् ऋषीणां काचिदलौकिकी चेतना दृश्यते। एतस्मादेव कारणात् पर्यावरणस्य प्राकृतिक-घटकेषु तत्तदभिमानि-देवानां सद्भावोऽभ्युपगतस्तत्र। ऋग्वेदे त्रयस्त्रिंशत् देवानां वर्णनमस्ति, ये प्रत्यक्षाप्रत्यक्ष-रूपेण पर्यावरण-सम्पूरकास्सन्ति। उक्तञ्च यजुर्वेदे-

**'अग्निर्देवता वायो देवता सूर्यो देवता, चन्द्रमा देवता। वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥'**

-यजुर्वेदः १४.२०

वस्तुतो वेदेषु प्राकृतिक-शक्तीनामेव देवत्व-रूपेण मानवीय-करणं कृतमस्ति। वायुः, जलम्, मृत्तिका, सूर्यप्रकाशादयः सर्वाण्येव पर्यावरणस्य घटकास्सन्ति, किन्त्वेतेषु पर्यावरण-तत्त्वेषु वायोः प्राधान्यमसन्दिग्धमेव। वायुं विना जीवानां जीवनमेव सङ्कटापन्नं वर्तते। अत एव स्तौति वैदिकर्षिः। यथा-

**'नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि ।**
**त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि ॥'**

-तैत्तिरीयोपनिषद् ५०.१

जीवनामृतरूपवायुः सर्वजीवानां जीवनाधारः वर्तते। यथोक्तम्-

**'यददो वात ते गृहेऽमृतस्य निधिर्हितः।**
**ततो नो देहि जीवसे ॥**

-ऋग्वेदः १०.१८६.३

वायुः न केवलं प्राणदाता अपितु प्राणिमात्रेभ्यः परमौषधमपि कथितमृषिभिः। यथा-

आ वात वाहि भेषजं विवात वाहि तद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥

-ऋग्वेदः १०.१३७.३

अपि च-

www.thearyasamaj.org

'वात आ वातु भेषजं शम्भु मयोभु नो हृदे।
पण आयूंषि तारिषत् ॥ '

-ऋग्वेद: १०.१८६.१

वायवीयं पर्यावरणं शुद्धं यथा स्यात्, तदर्थं वेदे वायु-शोधनार्थं भृशमग्निहोत्रादिहोमस्य विधानं लभ्यते। होमादिना वायोश्शुद्धि: शक्या कर्तुम् इति स्थाने स्थाने प्रतिपादितमस्ति। तत्र घृतादिपौष्टिक-तत्त्वोद्भूतधूम्रो वायुमण्डले व्याप्तान् विषाणून् विनाशयित्वाऽखिलं वायु-मण्डलं शोधयति। महर्षिदयानन्देन ऋग्वेदादिभाष्यभूमिकायामुक्तम्-

'यज्ञाद् यो वाष्पो जायते, स वायुं वृष्टिजलं च निर्दोषं कृत्वा सर्वजगति सुखायैव भवति।'

-ऋग्वेदादिभाष्यभूमिका, पृष्ठ ३५

एवमेव ध्वनि-प्रदूषणस्य समस्या यद्यपि न वर्तते तदा, तथापि कतिपय-मन्त्रा: द्रष्टव्यास्तत्र यजुर्वेदे सन्ति। यथा-

'द्यां मा लेखीरन्तरिक्षं मा हिंसी: पृथिव्या सम्भव ।'

-यजुर्वेद: ५.४३

'श्रोत्रं ते शुन्धामि।'

-यजुर्वेद: ६.१४

'अन्तरिक्षं दृं ह्यन्तरिक्षं मा हिंसी: ।'

-यजुर्वेद: १४.२२

इत्यत्र श्रोत्रेन्द्रिय-हानिकरं ध्वनि-प्रदूषणं शोधनीयम्, अन्तरिक्षे च ध्वनि-प्रदूषणं न कार्यमित्यादिष्टम्। जलमेव जीवनं वर्तते, अत एव उक्तं वैदिक-संहितासु। यथा-

'अप्स्वन्तरमृतमस्तु भेषजम् ।
अपामुत प्रशस्तिभिर्देवा भवथ वाजिनो ।।'

-ऋग्वेद: १.२३.१९

'अप्स्वन्तरमृतमप्सु भेषजम्। अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो। गावो भवथ वाजिनी: ।।'

-अथर्ववेद: १.४.४

उक्तञ्च सायणाचार्य-महोदयेन (ऋग्वेद: १.२३.१९) श्रुत्यन्तराच्च तथैवप्सु भेषजम् औषधं वर्तते। क्षुद्रोगनिवर्तकस्य अन्नस्य अब्कार्यत्वात्। शुद्धजलमेव इष्टसिद्धये पानार्थञ्च उपयुक्तं भवति, अतएव प्रार्थयते ऋषि:। यथा-

'शन्नो देवीरभिष्टये आपो भवन्तु पीतये।
शं योरभिस्रवन्तु न: ।।'

-अथर्ववेद: १.७.१, यजुर्वेद: ३६.१२

अपि च -

'शुद्धा न आपस्तन्वे क्षरन्तु।'

-अथर्ववेद: १२.१.३०

'यो व: शिवतमो रसस्तस्य भाजयतेह न: ।'

-यजुर्वेद: ३६.१५

'सुमित्रिया नऽआपऽओषधय: सन्तु ।'

-यजुर्वेद: ३६.२३

'आपो विश्वस्य भेषजीस्तास्ता मुञ्चन्तु क्षेत्रियात्।।'

-अथर्ववेद: ३.७५

www.thearyasamaj.org

सर्वेष्वेव प्राकृतिक-संसाधनेषु जलं सर्वाधिकं महत्त्वपूर्णं संसाधनमस्ति। जलं विना भूमि, मृद्, वनस्पतय:, जन्तव:, खनिज-द्रव्यादयश्च मानवोपयोगाय अर्हाणि न भवन्ति। प्रत्यक्षरूपेण जलेनैव शरीर-शुद्धि:, मनश्शुद्धि:, तृप्ति:, पुष्टिश्च भवति, अप्रत्यक्षरूपेण च कृषिकार्ये उद्योगेषु ऊर्जा-संसाधने परिवहने राष्ट्रिय-रक्षा-संसाधने पर्यावरण-संरक्षणे च जलस्य अपरिहार्यता स्पष्टमेव। निरुक्तेऽपि (१.१२) जलस्योपयोगित्वं जीव-लोकेन तदपरिहार्यत्वञ्च प्रतिपादितमस्ति ।

यद्यपि प्रकृतेरक्षयभाण्डारो जीवानाम् उपयोगायैव किन्तु शाश्वतिक-तद्रूपता तदैवाक्षुण्णा भवितुमर्हति, यदा यदपि यावत् परिमाणं प्रकृतेर्गृह्यते तस्य प्रतिपूर्तिरपि भवेत्। जीवानामुपभोग्यं जलमेकतोऽक्षय-संसाधन-रूपेण तिष्ठति, अथर्ववेदे (१२.१.९) यथोक्तम्-

**'यस्यामाप: परिचरा: समानीरहोरात्रे अप्रमादं क्षरन्ति ।'**

अपरतश्च तदुपरि पर्यावरणीय-घटकानां सर्वाधिक: परिमाणात्मको गुणात्मकश्च प्रभावो दृश्यते। अतएव जलस्य सम्भाव्याभावापेक्षयैव ऋषिरूप-वैज्ञानिकैरभीष्ट-जल-लाभाय तस्योत्पत्ते: रासायनिक-प्रक्रिया-रूपेण नैत्यिक-नैमित्तिक-यज्ञ-विधानं रचितम्। वैदिक-वाङ्मये अनेकत्र जलकर्तृ-रूपेण हवि: स्मृतम्।

यजुर्वेदे यज्ञस्य महिमा आद्यन्तं वर्णिता, उक्तञ्च तत्र-

**'निकामे निकामे न: पर्जन्यो वर्षतु फलवत्यो न ओषधय: पच्यन्तां योगक्षेमो न: कल्पताम् ।'**

-यजुर्वेद: २२.२२

विद्युद्-रूपाग्नौ सङ्घट्यमाने यदा जलधारास्स्रवन्ति, तदा जातवेद: प्रसीदति। अग्निर्हविभुक् हव्यवाहनमित्युच्यते। यागादिषु सोमादि-हविष: सूक्ष्म-पोषक-तत्त्वान्याहृत्य अग्नि: यत्तापं जनयति, तदूष्मा धूम-रूपेण वाष्पीकृत्य अन्तरिक्षे नयति। तत्र च अग्नि-वायु-संयोगेन शीतीकरण-क्रिया भवति। तस्मादन्तारिक्षे जलोत्पत्तिर्जायते। तदेव सूक्ष्म-जलं वाय्वादिभि: सम्प्रेर्यमाणो वर्षा-रूपेण प्राप्यते। यथोक्तं शतपथब्राह्मणे-

**'अग्निर्वै धूमो जायते, धूमादभ्रमभ्राद् वृष्टि: ।'**

-शतपथब्राह्मणम् ५.३.५.१७

अपि च यजुर्वेदेऽपि निगदितम् -

**'मरुतां वशा पृश्निर्भूत्वा दिवं गच्छ ततो वृष्टिमावह ।'**

-यजुर्वेद: २.१६

एवं सन्दिष्टम् ऋषिभिर्यत् शुद्धधूमं परिकल्पयितुं तद्द्वारा च वृष्ट्यागमनार्थं यज्ञ-विधानं कर्तव्यम्।

वैदिक-वाङ्मये जलानामनेक-प्रकाराणां वर्णनमस्ति। ता आप: सुख-कारिण्यो भवन्तु, इति कामयते ऋषि:। यथा-

www.thearyasamaj.org

'शं त आपो हैमवती: शमु ते सन्तूत्स्या:।
शं ते सनिष्यदा आप: शमु ते सन्तु वर्ष्या:॥'

... ... ... ... ...

'शं त आपो धन्वन्या: शं ते सन्त्वनूप्या:।
शं ते खनित्रिमा आप: शं या कुम्भेभिराभृता:॥'

-अथर्ववेद: १९.२.१२

अद्यत्वे अस्माकं सर्वकारेण पर्यावरणस्य संरक्षणार्थं जल-प्रबन्धनस्य लक्ष्याणि- '**जल-सरक्षणं, जल-संवर्धनं, जलोपलब्धिश्च**', निर्धारितानि सन्ति, किन्तु वैदिक-वाङ्मये ऋषीणाम् एतावद्सम्बन्धि-चिन्तनं प्राचीनकालैव स्पष्टतया परिलक्ष्यते। '**नद्य: लोकमातर:**' इत्युक्त्वा नदीनां महत्त्वं स्वीकृतं तत्र। यदा नद्य: '**देवी**' इति सागराश्च '**देवता**' इति सम्पूजितास्तदा कोऽवकाश: तेषां प्रदूषणस्य ? जले अमेध्य-वस्तूनां प्रक्षेपस्य मलादि-विसर्गस्य च सर्वथा निषेधो वर्तते तत्र, तद्यथा-

**'नास्तु मूत्रपुरीषं कुर्यात्र निष्ठवेत्।'**

-तै. आ. १.२६.७

यदि नद्यादिषु प्रदूषणं जातं, तर्हि तच्छोधनीयम्। यथोक्तम्-

**'यन्नदीषु परिजायते विषम्।**
**विश्वे देवा निरिस्तत् सुवन्तु॥'**

-ऋग्वेद: ७.५०.३

**'सर्वा नद्यो अशिमिदा भवन्तु।'**

-ऋग्वेद: ७.५०.४

अपि च -

**'मापो मौषधिर्हि सीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च।'**

-यजुर्वेद: ६.२२

अथर्ववेदे '**पृथिवी**'-सूक्ते पर्यावरण-चिन्तनस्य उदात्त-रूपं प्रस्तुतीकृतमस्ति। यथा -

**'माता भूमि: पुत्रोऽहं पृथिव्या:।**
**पर्जन्य: पिता स उ न: पिपर्तु:॥'**

-अथर्ववेद: १२.१.१२

अपि च-

**'यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टय: सम्बभूवु:। यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमि: पूर्वपेये दधातु॥'**

-अथर्ववेद: १२.१.३

**'यस्यामाप: परिचरां समानीरहोरात्रे अप्रमादं क्षरन्ति। सा नो भूमिर्भूरि धारा पयो दुहामथो उक्षतु वर्चसा॥'**

-अथर्ववेद: १२.१.९

**'गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिविं स्योनमस्तु। बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्। अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम्॥'**

-अथर्ववेद: १२.१.११

**'विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्। शिवां स्योनामनु चरेम विश्वहा॥'**

-अथर्ववेद: १२.१.१७

एवं विश्वधारिका पृथिवी स्तुत्या कथिता ऋषिभि:। यथा-

**'यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठति विश्वहा। पृथिवीं विश्वधायसं धृतामच्छावदामसि॥'**

-अथर्ववेद: १२.१.२७

www.thearyasamaj.org

भूमि-संरक्षणस्य सङ्केतोऽपि प्राप्यते तत्र। वेदे प्रार्थना कृता यद् हे पृथिवि! वृक्ष-रहितानि ते स्थानानि शीघ्रं पूरितानि स्युः। वृक्षच्छेद-व्याजेन तव मर्म-स्थलं मया कदापि व्याहतं न भवेत्। अथर्ववेदे यथा-

**'यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु ।**
**मा ते मर्म विमृग्वरि माते हृदयमर्पितम् ।।'**

-अथर्ववेदः १२.१.३५

पर्यावरण-संरक्षणार्थं वृक्षाणां महत्त्वं सुविदितमेव। वैदिक-वाङ्मये वृक्षाणामपि देवतात्वं स्वीकृत्य स्थाने-स्थाने वनौषधीनां स्तवनं कृतं वैदिकर्षिभिः। यजुर्वेदे यथा-

**'नमो वृक्षेभ्यो हरिकेशेभ्यः।'**

-यजुर्वेदः १६.१७

न केवलं वृक्षाणामपितु तत्पालकानामपि स्तवनं कृतं वैदिक-वाङ्ये। यथा -

**'वनानां पतये नमः।'**

-यजुर्वेदः १६.१९

**'वृक्षाणां पतये नमः।'**

-यजुर्वेदः १६.१९

**'औषधीनां पतये नमः।'**

-यजुर्वेदः १६.१९

**'अरण्यानां पतये नमः।'**

-यजुर्वेदः १६.२०

**'नमो वन्याय च।'**

-यजुर्वेदः १६.३४

वनस्पतयः शान्ति-प्रदायकाः कथितास्तत्र, यतोहि ते हानि-कारकं वायुमात्मसात् कुर्वन्ति, जीवन-दायकञ्च सुखकरं प्राणवायुं प्रवहन्ति। यथा -

**'वनस्पतिः शमितारम् ।'**

-यजुर्वेदः २८.१०

**'वनस्पतिः शमिता ।'**

-यजुर्वेदः २९.३४

मैत्रायिणीसंहितायां स्पष्टमेवोक्तम्-

**'वायुगोपा वै वनस्पतयः।'** (३.१.४)।

अपि च, यजुर्वेदे स्पष्टीकृतं यद् जलमस्ति ओषधि-वर्धकः, ओषधयश्च जल-वर्धकाः। यथा-

**'समाप ओषधीभिः समोषधयो रसेन।'**

-यजुर्वेदः १.१२

वस्तुतः वृक्षाणां पर्यावरण-संशुद्धिपरकं जगत्संरक्षण-परकञ्च महत्त्वं सम्यक्-स्फुटीभवति वैदिक-वाङ्मये। अत एव वृक्षारोपणं कुर्यादित्युपदिशति ऋषिस्तत्र। यथा-

**'वनस्पतिं वन आस्थापयध्वम्।'**

-ऋग्वेदः १०.१०.११

ऋग्वेदस्य **'अरण्यानी'**-सूक्तं पादपैः सह प्राण-धारिणां सहावस्थानं पारस्परिकमुपजीवित्वञ्च स्पष्टरूपेण दृश्यते। यथा -

**उत गाव इवादन्त्युत वेश्मेव दृश्यते ।**
**उतो अरण्यानि सायं शकटीरिव सर्जति ।।**

-ऋग्वेदः १०.१४६.३

www.thearyasamaj.org

तत्र अरण्यानी प्रभूतान्नयुता सर्वेषां जन्तूनाञ्च मातृ-रूपेण वर्णिता वर्तते। यथा-

**'आञ्जनगन्धिं सुरभिं बहन्तामकृषीवलाम् ।**
**प्राहं मृगाणां मातरमरण्यानिमशंसिषम् ॥'**

-ऋग्वेदः १०.१४६.६

अद्यत्वे उपभोगिता-वादिनो जनाः स्वार्थ-पूर्तये महता लोभेन प्रकृतेरतिदोहनं कुर्वन्ति, किन्तु वैदिक-वाङ्मये नैकेषु मन्त्रेषु भूमि-वनादीनां संरक्षण-विषयक-चिन्तनमपि स्पष्टतया दृश्यते ऋषीणाम्। तद्यथा-

**'त्यक्त्येन भुञ्जीथाः मा गृधः।'**

-यजुर्वेदः

**'यद् ते भूमे विखनामि क्षिप्रं तदपि रोहतु'**

-अथर्ववेदः १२.१३५

**'मा काकम्बीरमुद् वृहो वनस्पति मशस्तीर्विहनीनशः।'**

ऋग्वेदः ६.४.८-७

ओषध्यादीनां हिंसा निषिद्धास्तत्र-

**'मोषधीर्हिंसीः ।'**

-यजुर्वेदः ६.२२

अपि च-

**'पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषम् ।'**

-यजुर्वेदः १.२५

अन्यत्रापि कथितं यजुर्वेदे-

**'मा द्यावापृथिवी अभिशोची. ... ... .. मा वनस्पतीन् ।'**

-यजुर्वेदः ११.४५

वैदिक-वाङ्मये समस्तानां प्राणिनां निरामयत्वं प्रतिपादितमस्ति। यथा- **'पशून् पाहि।'** (यजुर्वेदः १.१), **'गां मा हिंसीः।'** (यजुर्वेदः १३.४३), **'इमं मा हिंसीर्द्विपादं पशुम्।'** (यजुर्वेदः १३.४७), **'सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः।'** (अथर्ववेदः १.१५.१)

अपि च-

**'शं नो अस्तु द्विपदे शं चतुष्पदे।'**

-यजुर्वेदः ३६.८

वैदिक-वाङ्मये सूर्यः समस्त-स्थावर-जङ्गमस्य **'आत्मा'** कथितः। यथा -

**'सूर्य आत्मा जगतस्तस्थुषश्च।'**

-ऋग्वेदः १.११५.१

सूर्यो भुवनस्य पृथिव्यादिलोकस्य वृष्ट्यादिना पोषकः वर्तते, अत एव स्तुत्यः। यथा-

**'भुवनस्य य पतिरेक एव नमस्यो विक्ष्यीड्यः।'**

-यजुर्वेदः २.१

सूर्य-रश्मयः वायु-मण्डले व्याप्तान् क्रिमीन् नाशयन्ति। यथा-

**'उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः। ये अन्तः क्रिमयो गवि ॥'**

-अथर्ववेदः ३.३२.१

वैदिक-वाङ्मये ऋषीणां इयं कामना वर्तते यद् वायुः सूर्यातपः, अग्निर्जलानि च सर्वेभ्यः कल्याणकारिणः भवन्तु-

**शं नो वातः पवतां शं नस्तपतु सूर्यः ।**
**शं न कनिक्रदद् देवः पर्जन्यो अभिवर्षतु ॥**

-यजुर्वेदः ३६.१०

www.thearyasamaj.org



अपि च ऋग्वेदेऽपि प्रतिपादितम् -

**'स नः पितेव सूनवेऽग्ने सूपायनो भव।**
**सचस्वा नः स्वस्तये।।'**

-ऋग्वेदः १.१.९

पर्यावरण-प्रदूषणमधुना विश्वस्य भीषण-तमा समस्या वर्तते। स्थलानि जलानि वायवश्च अवाञ्छितेन अपशिष्टेन परिपूर्णास्सन्ति। एतेन प्रदूषणेन मानवानां स्वास्थ्यं नाना-व्याधियुक्तं जातम्। पर्यावरणस्य प्रदूषणं न केवलं मानवेभ्यः विपत्तिकारकमपितु सम्पूर्ण-पारिस्थितिकी-तन्त्राय असन्तुलनकरमपि।

यद्यपि वैदिक-काले पर्यावरण-प्रदूषणस्य समस्या न वर्तते स्म, तथापि प्राक्तनानामृषीणां एतत्सम्बन्धि-चिन्तनं दर्शनीयम्-

**'मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः।**
**माध्वीर्नः सन्त्वोषधीः॥'**

.... ... ... ...

**'मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः।**
**मधु द्यौरस्तु नः पिता॥'**

... ... ... ...

**'मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः।**
**माध्वीर्गावो भवन्तु नः॥'**

-यजुर्वेदः १३.२७.१९

वैदिक-वाङ्मये ऋषीणां पर्यावरण-चिन्तनं यत्र-तत्र संदृश्यते। ऋषयस्ते सर्वत्र सम्पूर्ण-प्राणिमात्रस्य शान्तये प्रार्थनां कुर्वन्ति, येन पर्यावरणस्य सर्वेऽपि जैविकाजैविकघटकाः सन्तुलितावस्थायां तिष्ठन्तु निरुपद्रवाश्च भवन्तु। तद्यथा-

**'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥'**

-यजुर्वेदः २६.१७

इति दिक्।

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
**भारतोदयः (संस्कृत-मासिकम्)**
P.O. गुरुकुलकाङ्गड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)

सेवायाम्,
श्री........................................

मुद्रकेण,प्रकाशकेनडॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते'न्यू जे.एन. स्टेशनरी मार्ट' नामकेमुद्रणालये मुद्रापयित्वा'भारतोदयः' मासिकंपत्रंप्राकाश्यंनीतंहरिद्वार-स्थितयाज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
सम्पादकः डॉ. हरिगोपालशास्त्री